श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते दशमस्कन्धे

# ॥ श्री कालियपत्नी स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कालियपत्नी स्तुतिः ॥

नागपत्न्य ऊचुः

न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिन्
    तवावतारः खलनिग्रहाय।
रिपोः सुतानामपि तुल्यदृष्टिः
    धत्से दमं फलमेवानुशंसन् ॥ 1 ॥

अनुग्रहोऽयं भवतः कृतो हि नो
    दण्डोऽसतां ते खलु कल्मषापहः।
यद् दन्दशूकत्वममुष्य देहिनः
    क्रोधोऽपि तेऽनुग्रह एव सम्मतः ॥ 2 ॥

तपः सुतप्तं किमनेन पूर्वं
    निरस्तमानेन च मानदेन।
धर्मोऽथ वा सर्वजनानुकम्पया
    यतो भवांस्तुष्यति सर्वजीवः ॥ 3 ॥

कस्यानुभावोऽस्य न देव विद्महे
    तवाङ्घ्रिरेणुस्पर्शाधिकारः।
यद्वाञ्छया श्रीर्ललनाचरत्तपो
    विहाय कामान् सुचिरं धृतव्रता ॥ 4 ॥

न नाकपृष्ठं न च सार्वभौमं
    न पारमेष्ठ्यं न रसाधिपत्यम्।

न योगसिद्धीरपुनर्भवं वा
वाञ्छन्ति यत्पादरजःप्रपन्नाः ॥ 5 ॥

तदेष नाथाप दुरापमन्यैः
तमोजनिः क्रोधवशोऽप्यहीशः।
संसारचक्रे भ्रमतः शरीरिणो
यदिच्छतः स्याद् विभवः समक्षः ॥ 6 ॥

नमस्तुभ्यं भगवते पुरुषाय महात्मने।
भूतावासाय भूताय पराय परमात्मने ॥ 7 ॥

ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये।
अगुणायाविकाराय नमस्ते प्राकृताय च ॥ 8 ॥

कालाय कालनाभाय कालावयवसाक्षिणे।
विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ 9 ॥

भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने।
त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ 10 ॥

नमोऽनन्ताय सूक्ष्माय कूटस्थाय विपश्चिते।
नानावादानुरोधाय वाच्यवाचकशक्तये ॥ 11 ॥

नमः प्रमाणमूलाय कवये शास्त्रयोनये।
प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ॥ 12 ॥

नमः कृष्णाय रामाय वसुदेवसुताय च।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ 13 ॥

नमो गुणप्रदीपाय गुणात्मच्छादनाय च।
गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ 14 ॥

अव्याकृतविहाराय सर्वव्याकृतसिद्धये।
हृषीकेश नमस्तेऽस्तु मुनये मौनशीलिने॥ **15**॥

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः।
अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च हेतवे॥ **16**॥

त्वं ह्यस्य जन्मस्थितिसंयमान् प्रभो
    गुणैरनीहोऽकृतकालशक्तिधृक्।
तत्तत्स्वभावान् प्रतिबोधयन् सतः
    समीक्षयामोघविहार ईहसे॥ **17**॥

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां
    शान्ता अशान्ता उत मूढयोनयः।
शान्ताः प्रियास्ते ह्यधुनावितुं सतां
    स्थातुश्च ते धर्मपरीप्सयेहतः॥ **18**॥

अपराधः सकृद् भर्त्रा सोढव्यः स्वप्रजाकृतः।
क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वामजानतः॥ **19**॥

अनुगृह्णीष्व भगवन् प्राणांस्त्यजति पन्नगः।
स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयताम्॥ **20**॥

विधेहि ते किङ्करीणामनुष्ठेयं तवाज्ञया।
यच्छ्रद्धयानुतिष्ठन् वै मुच्यते सर्वतो भयात्॥ **21**॥

॥ इति श्री कालियपत्नी स्तुतिः समाप्ता॥